श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## गोपी गीत



प्रेम का रस बिछोह की पाती
गोपी गीत अमृत की भांति

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्**

**नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्**

**श्रीमद्भागवतमहापुराणम्**

**दशमः स्कंधः**

**अथैकत्रिंशोऽध्यायः**

**गोप्य ऊचुः**

**जयति तेऽधिकं(ञ्) जन्मना व्रजः(श्),**
**श्रयत इन्दिरा शश्वदत्र हि ।**
**दयित दृश्यतां(न्) दिक्षु तावकास्-**
**त्वयि धृतासवस्त्वां(वँ) विचिन्वते ॥ 1॥**

धृता+ सवस्+ त्वां(वँ)

शरदुदाशये साधुजातसत्,
सरसिजोदरश्रीमुषा दृशा ।
सुरतनाथ तेऽशुल्कदासिका,
वरद निघ्नतो नेह किं(वँ) वधः ॥ 2॥

सरसि+ जोदर+ श्रीमुषा

विषजलाप्ययाद् व्यालराक्षसाद्,
वर्षमारुताद् वैद्युतानलात् ।
वृषमयात्मजाद् विश्वतोभया-
दृषभ ते वयं(म्) रक्षिता मुहुः ॥ 3॥

विष+ जलाप्ययाद् ,
व्याल+ राक्षसाद् , वर्ष+ मारुताद्
वैद्युता+ नलात् ,वृष+ मयात्मजाद्

न खलु गोपिकानन्दनो भवा-
नखिलदेहिनामन्तरात्मदृक् ।
विखनसार्थितो विश्वगुप्तये,
सख उदेयिवान् सात्वतां(ङ्) कुले ॥ 4॥

नखिल+ देहिना+ मन्त+ रात्मदृक्
विखन+ सार्थितो

विरचिताभयं(वँ) वृष्णिधुर्य ते,
चरणमीयुषां(म्) सं(म्)सृतेर्भयात् ।
करसरोरुहं(ङ्) कान्त कामदं(म्),
शिरसि धेहि नः(श्) श्रीकरग्रहम् ॥ 5॥

विरचिता + भयं,
सं(म्)सृतेर् + भयात्

व्रजजनार्तिहन् वीर योषितां(न्),
निजजनस्मयध्वं(म्)सनस्मित ।
भज सखे भवत्किं(ङ्)करीः(स्) स्म नो,
जलरुहाननं(ञ्) चारु दर्शय ॥ 6॥

व्रज+ जनार् + तिहन् ,
निज+ जनस्मय+ ध्वं(म्)सनस्मित

प्रणतदेहिनां(म्) पापकर्शनं(न्),
तृणचरानुगं(म्) श्रीनिकेतनम् ।
फणिफणार्पितं(न्) ते पदाम्बुजं(ङ्),
कृणु कुचेषु नः(ख्) कृन्धि हृच्छयम् ॥ 7॥

प्रणत+ देहिनां(म्) ,
तृण+ चरानुगं(म्) , फणि+ फणार्पितं(न्)

मधुरया गिरा वल्गुवाक्यया,
बुधमनोज्ञया पुष्करेक्षण ।
विधिकरीरिमा वीर मुह्यती-
रधरसीधुनाऽऽप्याययस्व नः ॥ 8॥

वल्गु+ वाक्यया , बुध+ मनोज्ञया ,
विधि+ करी+ रिमा , रधर+सीधुनाऽऽ+ प्याययस्व

तव कथामृतं(न्) तप्तजीवनं(ङ्),
कविभिरीडितं(ङ्) कल्मषापहम् ।
श्रवणमङ्गलं(म्) श्रीमदाततं(म्),
भुवि गृणन्ति ते भूरिदा जनाः ॥ 9॥

तप्त+ जीवनं(ङ्),
कवि+ भिरीडितं(ङ्)

**प्रहसितं(म्) प्रिय प्रेमवीक्षणं(वँ्),**

**विहरणं(ञ्) च ते ध्यानमङ्गलम् ।**

**रहसि सं(वँ्)विदो या हृदिस्पृशः(ख्),**

**कुहक नो मनः(ह) क्षोभयन्ति हि ॥ 10॥**

प्रेम+ वीक्षणं(वँ्)

**चलसि यद् व्रजाच्चारयन् पशून्,**

**नलिनसुन्दरं(न्) नाथ ते पदम् ।**

**शिलतृणां(ङ्)कुरैः(स्) सीदतीति नः(ख्),**

**कलिलतां(म्) मनः(ख्) कान्त गच्छति ॥ 11॥**

व्रजाच् + चारयन्

शिल+ तृणां(ङ्)+ कुरैः(स्)

**दिनपरिक्षये नीलकुन्तलैर्-**

**वनरुहाननं(म्) बिभ्रदावृतम् ।**

**घनरजस्वलं(न्) दर्शयन् मुहुर्-**

**मनसि नः(स्) स्मरं(वँ्) वीर यच्छसि ॥ 12॥**

दिन+ परिक्षये

घन+रजस्+ वलं(न्)

**प्रणतकामदं(म्) पद्मजार्चितं(न्),**

**धरणिमण्डनं(न्) ध्येयमापदि ।**

**चरणपं(ङ्)कजं(म्) शन्तमं(ञ्) च ते,**

**रमण नः(स्) स्तनेष्वर्पयाधिहन् ॥ 13॥**

पद्म+ जार्चितं(न्)

स्तनेष्+ वर्प+ याधिहन्

सुरतवर्धनं(म्) शोकनाशनं(म्),
स्वरितवेणुना सुष्ठु चुम्बितम् ।
इतररागविस्मारणं(न्) नृणां(वँ),
वितर वीर नस्तेऽधरामृतम् ॥ 14॥

सुरत+ वर्धनं(म्), स्वरित+ वेणुना,
इतर+ रागविस् + मारणं(न्) नस् + तेऽधरा+ मृतम्

अटति यद् भवानह्नि काननं(न्),
त्रुटिर्युगायते त्वामपश्यताम् ।
कुटिलकुन्तलं(म्) श्रीमुखं(ञ्) च ते,
जड उदीक्षतां(म्) पक्ष्मकृद् दृशाम् ॥ 15॥

त्रुटिर् + युगायते , त्वाम+ पश्यताम्

पतिसुतान्वयभ्रातृबान्धवा-
नतिविलङ्घ्य तेऽन्त्यच्युतागताः ।
गतिविदस्तवोद्गीतमोहिताः(ख्),
कितव योषितः(ख्) कस्त्यजेन्निशि ॥ 16॥

पतिसुतान्वय+ भ्रातृबान्धवा,
तेऽन् + त्यच् + युतागताः
गति+ विदस्तवोद्+ गीतमोहिताः(ख्) , कस्त्य+ जेन्+ निशि

रहसि सं(वँ)विदं(म्) हृच्छयोदयं(म्),
प्रहसिताननं(म्) प्रेमवीक्षणम् ।
बृहदुरः(श्) श्रियो वीक्ष्य धाम ते,
मुहुरतिस्पृहा मुह्यते मनः ॥ 17॥

हृच्छ+ योदयं(म्),
मुहुरति+ स्पृहा

**व्रजवनौकसां(वँ) व्यक्तिरङ्ग ते,**
**वृजिनहन्त्र्यलं(वँ) विश्वमङ्गलम् ।**
**त्यज मनाक् च नस्त्वत्स्पृहात्मनां(म्),**
**स्वजनहृद्रुजां(यँ) यन्निषूदनम् ॥ 18॥**

**व्रज+ वनौ+ कसां(वँ), वृजि+ नहन् + त्र्यलं(वँ)**
**नस् + त्वत् + स्पृहात् + मनां(म्) , यन् + निषूदनम्**

**यत्ते सुजातचरणाम्बुरुहं(म्) स्तनेषु,**
**भीताः(श्) शनैः(फ्) प्रिय दधीमहि कर्कशेषु ।**
**तेनाटवीमटसि तद् व्यथते न किंस्वित्,**
**कूर्पादिभिर्भ्रमति धीर्भवदायुषां(न्) नः ॥ 19॥**

**सुजात+ चरणाम् + बुरुहं(म्), तेना+ टवी+ मटसि**
**कूर्पादि+ भिर् + भ्रमति, धीर् + भवदा+ युषां(न्)**

**इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्) सं(म्)हितायां(न्)**
**दशमस्कन्धे पूर्वार्धे रासक्रीडायां(ङ्) गोपीगीतं(न्)**
**नामैकत्रिं(म्)शोऽध्यायः ॥**

**ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**
**ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।**